শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮০

*স্যমন্তকোপাখ্যানম্*

সত্রাজিতস্ত্ৱমথ লুব্ধৱদর্কলব্ধং
 দিৱ্যং স্যমন্তকমণিং ভগৱন্নযাচীঃ।
ততকারণং বহুৱিধং মম ভাতি নূনং
 তস্যাত্মজাং ত্ৱযি রতাং ছলতো ৱিৱোঢুম্॥ ১ ॥

অদত্তং তং তুভ্যং মণিৱরমনেনাল্পমনসা
 প্রসেনস্তদ্ভ্রাতা গলভুৱি ৱহন্ প্রাপ মৃগযাম্।
অহন্নেনং সিংহো মণিমহসি মাংসভ্রমৱশাত
 কপীন্দ্রস্তং হত্বা মণিমপি চ বালায দদিৱান্॥ ২ ॥

শশংসুঃ সত্রাজিদ্গিরমনু জনাস্ত্ৱাং মণিহরং
 জনানাং পীযূষং ভৱতি গুণিনাং দোষকণিকা।
ততঃ সর্ৱজ্ঞোপি স্ৱজনসহিতো মার্গণপরঃ।
 প্রসেনং তং দৃষ্টৱা হরিমপি গতোভূঃ কপিগুহাম্॥ ৩ ॥

ভৱন্তমৱিতর্কযন্নতিৱযাঃ স্ৱযং জাম্বৱান
 মুকুন্দশরণং হি মাং ক ইহ রোদ্ধুমিত্যালপন্।
ৱিভো রঘুপতে হরে জয জযেত্যলং মুষ্টিভি-
 শ্চিরং তৱ সমর্চনং ৱ্যধিত ভক্তচূডামণিঃ॥ ৪ ॥

বুধৱাথ তেন দত্তাং
 নৱরমণীং ৱরমণিং চ পরিগৃহ্ণন্।
অনুগৃহ্ণন্নমুমাগাঃ
 সপদি চ সত্রাজিতে মণিং প্রাদাঃ॥ ৫ ॥

www.prapatti.com

তদনু স খলু ৱ্ৰীলালোলো ৱিলোলৱিলোচনাং
দুহিতৰমহো ধীমান্ ভামাং গিৰৈৱ পৰাৰ্পিতাম্।
অদিত মণিনা তুভ্যং লভ্যং সমেত্য ভৱানপি
প্ৰমুদিতমনাস্তস্যৈৱাদান্মণিং গহনাশযঃ॥ ৬ ॥

ৱ্ৰীলাকুলাং ৰমযতি ত্বযি সত্যভামাং
কৌন্তেযদাহকথযাথ কুৰূন্ প্ৰযাতে।
হী গান্দিনেযকৃতৱৰ্মগিৰা নিপাত্য
সত্ৰাজিতং শতধনুৰ্মণিমাজহাৰ॥ ৭ ॥

শোকাত্ কুৰূনুপগতামৱলোক্য কান্তাং
হত্বা দ্ৰুতং শতধনুং সমহৰ্ষযস্তাম্।
ৰত্নে সশঙ্ক ইৱ মৈথিলগেহমেত্য
ৰামো গদাং সমশিশিক্ষত ধাৰ্তৰাষ্ট্ৰম্॥ ৮ ॥

অক্ৰূৰ এষ ভগৱন্ ভৱদিচ্ছযৈৱ
সত্ৰাজিতঃ কুচৰিতস্য যুযোজ হিংসাম্।
অক্ৰূৰতো মণিমনাহৃতৱান্ পুনস্ত্বং
তস্যৈৱ ভূতিমুপধাতুমিতি ব্ৰুৱন্তি॥ ৯ ॥

ভক্তস্ত্বযি স্থিৰতৰঃ স হি গান্দিনেয-
স্তস্যৈৱ কাপথমতিঃ কথমীশ জাতা।
ৱিজ্ঞানৱান্ প্ৰশমৱানহমিত্যুদীৰ্ণং
গৰ্ৱং ধ্ৰুৱং শমযিতুং ভৱতা কৃতৈৱ॥ ১০ ॥

যাতং ভযেন কৃতৱৰ্মযুতং পুনস্ত-
মাহূয তদ্বিনিহিতং চ মণিং প্ৰকাশ্য।
তত্ৰৈৱ সুৱ্ৰতধৰে ৱিনিধায তুষ্যন
ভামাকুচান্তশযনঃ পৱনেশ পাযাঃ॥ ১১ ॥

**********

www.prapatti.com